GAP भाषा
A MULTILINGUAL JOURNAL OF RESEARCH
( ISSN – 2582-8770 )
Globally peer-reviewed and open access journal.

# श्रौतयज्ञपरम्परायामारोग्यविचारः|

## डॉ. अकल्पिता सप्रे

akalpitasapre@gmail.com

वेदस्यैव श्रुतिरिति नामधेयम्। श्रौतं नाम श्रुतिसम्बन्धि। श्रौतयज्ञा: नाम श्रुतौ संहितासु विहिता: यज्ञा:। एकविंशतिसंस्थो यज्ञो विज्ञायते। पाकयज्ञा: हविर्यज्ञा: सोमयज्ञाश्चेति त्रिषु विभागेषु यज्ञा: विभज्यन्ते। प्रतिसंस्थं सप्त यज्ञा वर्तन्ते। हविर्यज्ञसंस्थायां सोमयज्ञसंस्थायां च येषां यागानां समावेशो भवति, ते श्रौतयज्ञा इति उच्यन्ते। श्रौतयज्ञा: त्रैताग्निसाध्या:[1] वर्तन्ते।[2] एतेषामधिकारी आहिताग्निरेव। आहिताग्नित्वसिद्ध्ये[3] श्रौताधानं कर्तव्यम्।


अग्न्याधानोत्तरम् आहिताग्निना श्रुत्योक्तकर्माणि अनिवार्यरूपेणानुष्ठेयानि। सप्तहविर्यज्ञेषु[4] अन्यतम: प्रकार: इष्टिर्वर्तते। औषधमात्रद्रव्यक: श्रौतयाग: इष्टि:। इष्टिरिति पदेन निर्दिष्टानां सकलयागानां प्रकृतियाग: दर्शपूर्णमासेष्टि:। इष्टिषु दर्शपूर्णमासेष्टिरेव प्रकृति:।[5] 'स्वर्गकामो सर्वकामो वा दर्शपूर्णमासाभ्यां यजेत'।[6] एताभ्यां यावज्जीवं यजेत त्रिंशत् वा वर्षाणि[7] जीर्णो वा विरमेत्।[8] प्रकृतियागो नाम प्रकर्षेण अङ्गोपदेशो यत्र क्रियते स:। विकृतियागेषु तद्यागस्य उद्दिष्टं, प्रधानदेवता:, हविर्द्रव्याणि, याज्यापुरोनुवाक्याश्च इत्येतेषां भेदो भवति। अन्यत् तन्त्रं प्रकृतिवत् क्रियते।[9] श्रुतौ दर्शपूर्णमासेष्टे: बह्व्यो विकृतेष्टयो विकसिता:। ता: चतुर्विधा: -

१. नित्या:
२. नैमित्तिका:
३. काम्या:
४. प्रायश्चित्तात्मिका:

बहुविधकामनानां पूर्त्यर्थं श्रुतौ नैकानि काम्यकर्माणि आम्नातानि। श्रौतकाले यज्ञ एव जीवनस्य आधारभूत: आसीत्। अत एव यां कामपि कामनं पूरयितुं प्रामुख्येन यज्ञ: साधनत्वेन दृश्यते। सर्वासां काम्येष्टीनां प्रकृतेष्टि: दर्शपूर्णमासेष्टिरेव। काञ्चित् कामनामनुलक्ष्य विहिता इष्टि: काम्येष्टिरिति कथ्यते| शोधपत्रेऽस्मिन् श्रौतकाम्येष्टयो नाम श्रुतौ विहिता: काम्येष्टय: विषयीभूता:।

यजुर्वेदस्य तैत्तिरीयसंहिता, मैत्रायणीसंहिता, काठकसंहिता च एतानि त्रीणि मूलस्रोतांसि काम्येष्टीनाम् । एतासु द्विशताधिका: काम्येष्टय: (प्राय: २४९) उपलभ्यन्ते । तत्र वृष्टिकामना, पुत्रकामना, धनकामना, प्रजाकामना, पशुकामना इत्यादय: बहुविधकामना: अवलोक्यन्ते। शोधपत्रेऽस्मिन् केवलमारोग्यविषयक-श्रौतकाम्येष्टीनां विचारः कृत: । विंशति: इष्टयः आरोग्यकामना: प्रतिपादयन्ति । एतासु चक्षुष्कामना, आयुष्कामना, इत्यादीभि: सह मन:संबंधिनी एका इष्टि: विहिता । एवमिष्टीनामाधारेण वेदकालीनस्य समाजस्य आरोग्यविषयकं विचारं प्रतिपादयितुमस्मिन् शोधपत्रे प्रयत्नः क्रियते । आयुष्काम:, आमयावी, चक्षुष्काम: इत्यादय: कामना: अत्र सङ्कलिता:।

द्विशताधिका: काम्येष्टय: (प्राय: २४९) उपलभ्यन्ते । एतासां समग्रकाम्येष्टीनां संख्यात्मकं विवेचनमालेख्य प्रदर्श्यते आदौ।(Pie chart इति रूपेण।)





एतासु अन्यतमा दर्शपूर्णमासेष्टि:, उपरितनमालेखेन अवगच्छामः यत् १०३ काम्येष्टयः सन्ति| तासु ९५ काम्येष्टयः प्रापञ्चिककामना:

[1] आहवनीय: गार्हपत्य: दक्षिणाग्निश्च।
[2] Dharmadhikari. 2013. intro xli.
[3] आहितोऽग्निर्येन। वेदमन्त्रादिना कृतसंस्काराग्नियुक्त: आहिताग्नि:। वाच. खण्ड: २. पृ. ९०४.
[4] अथ हविर्यज्ञसंस्था:। अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासावाग्रयणं चातुर्मास्यानि दाक्षायणयज्ञ कौण्डपायिन्य इति। बौश्रौसू. २४.४., तासां हविर्यज्ञसंस्थानामग्न्याधेयमग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुबन्ध: सौत्रामणी पाकयज्ञ इति। लाश्रौसू. ५.४.२३.
[5] दर्शपूर्णमासाविष्टीनां प्रकृति:। आपश्रौसू. २४.३.३२.
[6] य एवं विद्वान् दर्शपूर्णमासौ यजते ताभ्यामेव सुवर्गं लोकमनुपश्यति। तैसं. २.५.६., स्वर्गकामो दर्शपूर्णमासौ। आपश्रौसू. ३.१४.८.
[7] पञ्चदशदाक्षायणेन दर्शपूर्णमासयो: स्थाने। वाश्रौसू. १.१.१.८५.
[8] आपश्रौसू. ३.१४.१०.
[9] विकृतौ सर्वार्थ: शेष: प्रकृतिवत्। पूमी. ३.४.३४.

https://www.gapbhasha.org/

GAP भाषा
A MULTILINGUAL JOURNAL OF RESEARCH
( ISSN – 2582-8770 )
Globally peer-reviewed and open access journal.

आवहन्ति|प्रापञ्चिककाम्येष्टीनां स्तम्भालेखः अधः प्रदश्यते|




उपरितन-स्तम्भालेखाधारेण अवगम्यते तत्र १९ इष्टयः आरोग्यविषयककामना: आवहन्ति एका इष्टि: मन:सम्बन्धिनी वर्तते| वेदकाले श्रौतयज्ञद्वारा आरोग्यप्राप्ति: इति विचारः आसीत्| स एव विचारं परीक्षितुमेतासामिष्टीनाम् आधारः अस्मिन् शोधपत्रे अवलम्बितः| अनुशीलितानामिष्टीनां कामना:, देवताहविर्द्रव्याणि, दक्षिणाश्च प्रदर्शयन्ती तालिका प्रदीयते।

| क्र. | कामना: | देवता: | हविर्द्रव्याणि | दक्षिणा |
|---|---|---|---|---|
| १. | आमयावी<br>मैसं. २.१.२ | १. अग्नि: वैश्वानर:<br>२. वरुण: | १. द्वादशकपालपुरोडाश:<br>२. यवमय: चरु: | |
| २. | आमयावी<br>तैसं. २.२.१० | १. सोमारुद्रौ | १.चरु: | अनड्वाह: |
| ३. | आमयावी<br>मैसं. २.२.१० | १. इन्द्र: अंहोमुक् | १. एकादशकपालपुरोडाश: | |
| ४. | आमयावी<br>तैसं. २.२.४ | १. अग्नि: पवमान्<br>२. अग्नि: पावक:<br>३. अग्नि: शुचि: | प्रत्येकमष्टाकपालपुरोडाश: | हिरण्यम् |
| ५. | आमयावी<br>मैसं. २.३.१ | १. अग्नि:<br>२. मित्रावरुणौ | १. अष्टाकपालपुरोडाश:<br>२. पयस्या | |
| ६. | आमयावी<br>तैसं. २.३.११ | १. अग्नि:<br>२. सोम:<br>३. वरुण:<br>४. सरस्वती<br>५. अग्नाविष्णू | १. अष्टाकपालपुरोडाश:<br>२. चरु:<br>३. दशकपालपुरोडाश:<br>४. चरु:<br>५. एकादशकपालपुरोडाश: | |
| ७. | आमयावी<br>कासं. १०.५ | १. अग्नि: रक्षोघ्न: | १. अष्टाकपालपुरोडाश: | |
| ८. | आमयावी<br>मैसं. २.१.४ | १. अग्नीवरुणौ | १. चरु: | |
| ९. | कृत्स्नायु: प्राप्तये<br>तैसं. २.२.३ | १. अग्नि: आयुष्मान् | १. अष्टाकपालपुरोडाश: | |
| १०. | आयुष्कामेष्टि:/ शतकृष्णलेष्टि:<br>तैसं. २.३.२ | १. प्रजापति: | १. शतकृष्णलायां घृते चरु: | |
| ११. | यो ज्यान्या मारणादपरोधाद्वा बिभीयात्<br>मैसं. २.२.१० | १. इन्द्र: त्राता | १. एकादशकपालपुरोडश: | मुष्कर: |
| १२. | प्रमायुक:<br>कासं. ११.२ | १. अग्नि: | १. अष्टाकपालपुरोडाश: | |

https://www.gapbhasha.org/


GRAND ACADEMIC PORTAL
RESEARCH JOURNALS

GAP भाषा
A MULTILINGUAL JOURNAL OF RESEARCH
( ISSN – 2582-8770 )
Globally peer-reviewed and open access journal.

GRAND ACADEMIC PORTAL (GAP) 2017
ज्ञान: अध्ययन: परम्परा

| | | | | |
|---|---|---|---|---|
| १३. | चक्षुष्काम:<br>तैसं. २.२.९ | १. अग्नाविष्णू | १. घृते चरु: | शतमानं हिरण्यम् |
| १४. | चक्षुष्काम:<br>तैसं. २.२.४ | १. अग्नि: पवमान्<br>२. अग्नि: पावक:<br>३. अग्नि: शुचि: | प्रत्येकमष्टाकपालपुरोडाश: | |
| १५. | चक्षुष्काम:<br>तैसं. २.३.८ | १. अग्नि: भ्राजस्वान्<br>२. सूर्य:<br>३. अग्नि: भ्राजस्वान् | १. अष्टाकपालपुरोडाश:<br>२. चरु:<br>३. अष्टाकपालपुरोडाश: | |
| १६. | यं न कुतश्चनातपेत्स<br>आपश्रौसू. ३.१५.४ | १. इन्द्र: | १. एकादशकपालपुरोडाश: | |
| १७. | दुश्चर्मा भविष्यामीति तैसं.२.२.१० | १. सोमापूष्णौ | १. चरु: | |
| १८. | रुक्काम:<br>तैसं. २.२.३ | १. रुक्मान् अग्नि: | १. अष्टाकपालपुरोडाश: | |
| १९. | क्लैब्याद्बिभीयात्<br>तैसं. २.३.३ | १. सोम: वाजी | १.श्यामाक: चरु: | |
| २०. | हतमना:<br>तैसं. २.२.८ | १. इन्द्र: मन्युमान् मनस्वान् | १. एकादशकपालपुरोडाश: | |

एवं चिररोगमुक्तये ८ इष्टयः, दीर्घायुष्यार्थं चतस्रः, चक्षुष्कामनायै तिस्रः, त्वक्-विषयका: तिस्रः इष्टयः तथा च वीर्यकामनायै एका इष्टि: विहिता| तथा च मन:सम्बन्धिनी एका इष्टि: वर्तते|




**इष्टीनां कतिचन वैशिष्ट्यानि-**

1. **आयुष्कामेष्टि:- शतकृष्णलेष्टि:** - 'यो मृत्योर्बिभीयात्तस्मा एतां प्राजापत्यां शतकृष्णलां[10] निर्वपेत्'।[11] तैत्तिरीयसंहितायां बौधायनश्रौतसूत्रे च मृत्योर्बिभीयादिति कामना विहिता अन्यत्र विधानेषु आयुष्कामना विद्यते।[12] अत्र शतं हिरण्यकृष्णलानि गुञ्जया तुल्यानि माषेण वा।[13] अस्यां यजुषा घृतमुत्पुनाति। हिरण्यमुत्पूय आज्यं स्थाल्यामानीय तस्मिन् कृष्णलानि आवपति। प्रत्यवदाने चत्वारि कृष्णलानि अवद्यति। आज्यमेव जुहोति न तु कृष्णलम्। एतदिष्टिसम्बन्धिनी आख्यायिका तैत्तिरीयसंहितायामुपलभ्यते।[14] मृत्योर्भीता: देवा: प्रजापतिमुपधावन्। स: एतां प्राजापत्यां शतकृष्णलां निरवपत्। शतकृष्णलै: प्रजापति: देवेभ्य: अमरत्वमददात्। अतो यो मृत्योर्बिभीयात् स: अनया यजेत। शतायु: पुरुष: अस्या: अनुष्ठानेन सम्पूर्णमायु: प्राप्नोति।
2. **कृत्स्नायु: प्राप्तये** - 'अग्नये आयुष्मते पुरोडाशमष्टाकपालं निर्वपेद् य: कामयेत सर्वमायुरिति'।[15] अग्नि: आयुष्मान् तस्मिन् पूर्णमायुष्यं दधाति।
3. **आमयावी** – इन्द्रायांहोमुचे एकादशकपालं निर्वपेदामयाविनं याजयेत्।[16] स्वेन भागधेयेन यजमान: एतमुपासरति। इन्द्रस्य भेषजा तनू: यजमानम् अंहसो मुञ्चति। तैत्तिरीयशाखीये सत्यपि आपस्तम्बश्रौतसूत्रे इयं 'य: स्पष्टं वक्तुं न शक्नोति अथवा श्रोतुं न शक्नोति' इति कामनाया: सूक्ष्मभेदेन विनिर्दिष्टा। यो नैव घोषन्नेव शृणुयात्स इन्द्रायांहोमुचे निर्वपेत्।[17] अन्यपरम्परायां कामनाभेदेन समाना इष्टि: वर्तते| अत्र कामनायां विशेषः विद्यते|

---

[10] यस्यां शतकृष्णलानि सन्ति सा शतकृष्णलेष्टि:।
[11] तैसं. २.३.२., बौश्रौसू. १३.२३.
[12] 'प्राजापत्यां शतकृष्णलां निर्वपेदायुष्काम:'। मैसं. २.२.२., कासं. ११.४., माश्रौसू. ५.१.९.६., सत्याश्रौसू. २२.४.१.
[13] सत्याश्रौसू. २२.४.१. वैजयन्तीव्याख्या।
[14] तैसं. २.३.२., बौश्रौसू. १३.५.
[15] तैसं. २.२.३.

https://www.gapbhasha.org/

( ISSN – 2582-8770 )
Globally peer-reviewed and open access journal.

4. **ज्योगामयावी** - 'अग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपेदग्नये पावकायाग्नये शुचये ज्योगामयावीति'।[18] पवमानोऽग्निः पापानां शोधकः प्राणमेवास्मिन् दधाति। अग्निः पावको वाचं शुचिः अग्निः आयुश्च अस्मै प्रयच्छति। गतप्राणो यजमानोऽपि अस्याः अनुष्ठानेन जीवति।[19] हिरण्यं दक्षिणारूपेण दद्यादिति केवलं बौधायनश्रौतसूत्रे[20] एव प्रोक्तम्।

अत्र अवगच्छामः यत् आयुष्कामनायै विहितासु इष्टीषु आधिक्येन अग्निरेव देवता| तथा च अग्नेः विशेषणानि आयुष्मान् इत्युक्ते यः आयुः ददाति, अथवा पावकः अग्निः नाम यः पुनाति इति| अंहोमुक् यः अंहः पाप दूरीकरोति इति| एवं देवतानां विशेषणेषु कामना दरीदृश्यते|

5. **ज्योगामयावी** - 'सोमारौद्रं चरुं निर्वपेज्ज्योगामयावी'।[21] चिररोगनिवृत्यर्थमनुष्ठीयते इयमिष्टिः। आमयाविनो रसोऽन्नं सोमं गच्छति शरीरमग्निम्।[22] इष्ट्यामस्याम् उच्यमानया याज्यया होता सोमदेवात् रसमग्निदेवाच्च यजमानस्य शरीरं निष्क्रामयति। अनयोः देवतयोः अवकृपया होता आर्तिं गन्तुमर्हति। अतः तस्मै अनड्वान् देयः। अनड्वान् वाहको भवति। होता च यज्ञस्य वाहक एव। अतो होत्रे अन्वाहार्यमासाद्य अनड्वान् दक्षिणारूपेण दद्यात्।

6. यः शारीरिकशक्तिह्रासात् बिभेति मारणादपरोधाद्वा, सः इन्द्राय त्रात्रे एकादशकपालपुरोडाशं निर्वपेत्।[23] इन्द्रो वै त्राता यजमानं त्रायते। केवलं मैत्रायणीसंहितायां निर्दिष्टा इयमिष्टिः अन्यशाखीये आपस्तम्बश्रौतसूत्रेऽपि द्विहविष्कारूपेण हविर्द्रव्यभेदेन च उपलभ्यते। इन्द्राय त्रात्रे चरुं द्वितीयं वैमृधाय कुर्याद्यो मृत्योर्ज्यान्या वा बिभीयात्।[24] अस्याः मुष्करो[25] दक्षिणा निर्दिष्टा।

हिरण्यं, मुष्करः, अनड्वान् एतादृश्यः दक्षिणाः यजमानस्य कामनाः एव द्योतयन्ति|

7. **चक्षुष्कामः** - अग्नये भ्राजस्वते[26] पुरोडाशमष्टाकपालं सौर्यं चरुमग्नये भ्राजस्वते पुरोडाशमष्टाकपालं निर्वपेत्, यः चक्षुष्कामः स्यात्।[27] आदित्यः समृद्ध्यै पयसि भवति। पयो वै घृतं पयश्चक्षुः। अतो मैत्रायणीपरम्परानुसारं शुक्लानां व्रीहीणां श्वेतगवां पयसि चरुः कर्तव्यः श्वेतानां गवामाज्यं च।[28] द्वेऽपि देवते प्रकाशदायकौ। अस्यां हविर्द्रव्ये कामना अवलोक्यते| यतः श्वेतं नाम तेजदायकमिति श्वेतगवामाज्यमिति हविर्द्रव्यं विहितम्|

7. **चक्षुष्कामः** - 'आग्नावैष्णवं घृते चरुं निर्वपेच्चक्षुष्कामः'।[29] तिमिरादिदोषनिवृत्यर्थं[30] यजमानः अनया यजेत। अग्निर्मनुष्याणां चक्षुषः प्रदाता, विष्णुः देवानाम्, अतः यजमानः एताभ्यां हविर्ददाति। एतौ च यजमानाय दृष्टिं यच्छतः इति मैत्रायणीसंहितायां वर्णितम्। तैत्तिरीयसंहितायां तु अग्नेः चक्षुषा मनुष्याः पश्यन्ति यज्ञस्य च देवाः । अतः आभ्यां हविर्भागोऽनुष्ठेय इति विहितम्। घृते चरुः कुतश्चेत् - घृतं धेनोः सत्त्वं भक्षिततृणादिपरिणामत्वात्, तण्डुलाः वृषभस्य कृष्यादिकार्येण। तस्मात् घृते चरुः कर्तव्यः। घृतचरू, धेनुवृषभौ, नेत्रद्वयं चेत्येवं युग्मानि सन्ति। मिथुनाद्धि सर्वाः प्रजाः जायन्ते इति भावः। घृतं हि तेजः। तेजो वै चक्षुः तस्मात् तेजसा एव चक्षुर्जनयति। अस्याः शतमानं हिरण्यं दक्षिणा यतो हिरण्यमायुः। शतायुर्वै पुरुषः अनया शतवीर्यत्वमवाप्नोति।[31] काठकतैत्तिरीयपरम्परायामस्याः इष्टेः 'राजनीष्टिः' इति संज्ञा लभ्यते। रजनः नाम कौणेयः (कुणेः अपत्यम्।) चक्षुषो लाभाय क्रतुजितन्नामकं जानकिम् (जनकस्य अपत्यम्।) अयात्। क्रतुजित् चक्षुर्वन्यः[32] रोगोपहतां दृष्टिं पुनर्दातुं शक्तः आसीत्। सः राजन्यस्य कृते एतामिष्टिं निरवपत्।[33] अतः अस्याः संज्ञा 'राजनीष्टिः' सञ्जाता।

8. **क्लीबत्वपरिहारेष्टिः** - सोमाय वाजिने श्यामाकं चरुं निर्वपेद्यः क्लैब्याद्बिभीयात्।[34] प्रजननसमर्थोऽन्नरसो वाजः। यदा वाजिनस्थानीयं प्रजननशक्तिं रेतः अस्मात् अपक्रामति रोगेणादृष्टविशेषेण वा तत्सामर्थ्यं प्रतिबध्यते, तदानीमस्य क्लीबत्वं सम्पद्यते तस्मात् क्लीबत्वात् बिभेति।[35] रेतो हि वा एतस्माद्वाजिनमपक्रामति। यस्य प्रजोत्पादनस्य क्षमता न्यूना भवति सः सोममेव वाजिनं स्वेन भागधेयेन उपधावति। स एव अस्मिन् रेतो वाजिनं प्रजननक्षमतां दधाति। केवलं तैत्तिरीयपरम्परायां वर्तते इष्टिरेषा।

9. **यं न कुतश्चनातपेत्स** – 'अथ यं न कुतश्चनातपेत्स इन्द्रायैव' एवं विधानं वर्तते। आपस्तम्बश्रौतसूत्रे[36] एव विनिर्दिष्टायामिष्ट्यामस्यां हविर्द्रव्यस्योल्लेखो विधाने न वर्तते। कामना अपि विशिष्टा विद्यते। यः ऊष्णसंवेदनहीनः स्यात्[37] सः पौर्णमासदिने इन्द्राय एकादशकपालपुरोडाशं कुर्यात्। पौर्णमासेष्ट्यां योजिता अधिका आहुतिरियमिति थिटेमहोदयेन अनुवादे स्पष्टीकृतम्।[38] सूत्रस्य भाष्येऽपि स्पष्टं वर्तते यत् 'यं रोगोपहतकायेन्द्रियं कुतश्चिदपि प्रकारादुष्णं वस्तु नाऽऽतपेत्स नित्यं वैमृधं कृत्वा इन्द्राय निर्वपेत्'।[39]

10. **कान्तिकामः/ रुक्कामः** - अग्नये रुक्मते पुरोडाशमष्टाकपालं निर्वपेत् रुक्कामः।[40] एतया इष्ट्या यजमानः कान्तिमान् दीप्तिमान् भवति ।त्वचारोगमुक्तये इष्टी विहिते एव तथा च कान्तिकामनायै अपि एका इष्टिः आम्नाता|

11. **हतमनाः** - इन्द्राय मन्युमते मनस्वते पुरोडाशमेकादशकपालं निर्वपेद् यो हतमनाः स्वयं पाप इव स्यादिति। रोगदरिद्रताधनहान्यादिना असत्यविचारेण वा यो हतमनाः स्वयंपापी भवति सः अनया यजेत। इन्द्रो मन्युमान् मनस्वान् अस्याः इष्टेः अनुष्ठातरि यजमाने इन्द्रियं मन्युं मनो दधाति।

---

[16] मैसं. २.२.१०., कासं. १०.९.

[17] आपश्रौसू. ३.१६.२.

[18] तैसं. २.२.४., बौश्रौसू.१३.६.

[19] ...यदीतासुर्भवति जीवत्येव... तैसं. २.२.४.

[20] एतयेष्ट्या यक्षमाण उपकल्पयते हिरण्यम्। बौश्रौसू.१३.६.

[21] तैसं. २.२.१०.,बौश्रौसू.१३.१८., सत्याश्रौसू. २.३.९.

[22] सोमारुद्रयोः ग्रसितमस्य अर्थः भट्टभास्कराचार्यैः तथा च कीथमहोदयेनापि सोमारुद्राभ्यां यजमानः गिलङ्कृतः इति क्रियते। तैसं. २.२.१०. Swallowed by Soma and Rudra. Keith. 1914. p 158.

[23] मैसं. २.२.१०.

[24] आपश्रौसू. ३.१६.७.

[25] Muṣkara means a bull with his testicles intact. Thite. 2004. p 129.

[26] अग्नये ज्योतिष्मतेऽष्टाकपालं निर्वपेत् सौर्यं चरुमग्नये ज्योतिष्मत उपरिष्टादष्टाकपालं चक्षुष्कामः ... इति काठकसंहितायां भ्राजस्वते स्थाने ज्योतिष्मते अग्नेः विशेषणं वर्तते। कासं. ११.१.

[27] तैसं. २.३.८., मैसं. २.३.६., बौश्रौसू. १३.३०., आपश्रौसू. १९.२३.३., माश्रौसू. ५.२.२.१९.

[28] ... शुक्ला व्रीहयो भवन्ति श्वेता गा आज्याय दुहन्ति... मैसं. २.३.६., माश्रौसू. ५.२.२.२०.

[29] तैसं. २.२.९., मैसं. २.१.७., कासं. १०.१, बौश्रौसू.१३.१५, सत्याश्रौ.सू. २२.३.५., माश्रौसू. ५.१.६.२७.

[30] सत्याश्रौसू. २२.३.५ वैजयन्तीव्याख्या।

[31] मैसं. २.१.७.

[32] चक्षुषो दृष्टेर्वननं संभजनं तदर्हतीति चक्षुर्वन्यः। तैसं. २.३.८. साभा.।, भिडेमहोदयेन अस्यार्थः 'नेत्ररोगतज्ज्ञः' इति अनुवादितः। भिडे. १९८७. पृ. २४१.

[33] रजनो वै कौणेयः क्रतुजितं जानकिं चक्षुर्वन्यमयात्। तैसं.२.३.८., रजनं कौणेयं क्रतुजिज्जानकिश्चक्षुष्कामं याजयाञ्चकार। कासं. ११.१.

[34] तैसं. २.३.३., बौश्रौसू. १३.२६.

[35] तैसं. २.३.३. साभा.।

[36] आपश्रौसू. ३.१६.४.

[37] A (sacrificer) whom (on account of some disease) there is no sensation of heat from anywhere. Thite. 2004. p 130.

[38] Should additionally prepare a sacrificial bread for Indra only. Thite. 2004. p 130.

[39] आपश्रौसू. ३.१६.४. धूर्तस्वामिभाष्यम्।

[40] तैसं. २.२.३.



https://www.gapbhasha.org/

मैत्रायणीसंहितायां कामनायां विधाने च सूक्ष्मभेदोऽवलोक्यते। इन्द्राय मनस्वते एकादशकपालं निर्वपेद्य: कामयेत पुण्य: स्यामनाधृष्य इति। 'अनाधृष्य' इति पदस्य अर्थ: कलाण्डमहोदयेन 'य: सङ्कटै: शत्रुभिश्च अस्पृष्ट: भवितुमिच्छति' इति कृत:। धर्माधिकारिमहोदयेन तु 'अप्रतिरोध्य:' (irresistable) इति। अस्या: इष्टे: अनुष्ठानात् प्राग् यजमान: आवर्षं 'मनस:' इति शब्दं न वदेत् एवं मैत्रायणीसंहितायां नियमो वर्णित:।

काठकसंहितायां विद्यमानाया: अस्या: इष्टे: कारणमीमांसा मैत्रायणीसंहिताया: सदृशा एव। परं कामनायां देवतायां च कश्चन भेदो विद्यते। इन्द्राय मनस्वते त्विषीमते एकादशकपालं निर्वपेद्य: कामयेत मनस्वी त्विषीमान् स्यामिति।

तिसृषु संहितासु कामनायां साम्यं यद् यजमानस्य हतोत्साह इति। परं काम्यं भेदम् अथ च देवतानां विशेषणान्तरं विहाय संहितात्रयेऽपि इष्टिरेषा यजमानस्य उत्साहवर्धनार्थमेव निगदिता।

## अवलोकनानि –

- एवम अनुमातुं शक्यते यद् य: पापमाचरति स: चिररोगग्रस्तो भवति। चिररोगस्य कारणं पापमेव मन्यन्ते तदा।
- यजमानस्य कामना देवताया: विशेषणेषु, हविर्द्रव्येष, दक्षिणासु वा अवलोक्यते|
- यां कामपि कामनां पूरयितुं प्रामुख्येन यज्ञ: साधनत्वेन दृश्यते।
- दीर्घायुष्प्राप्तये अधिका: इष्टय: विहिता: सन्ति|
- न केवलं त्वक्-रोगमुक्ति: अपेक्षिता अपि तु कान्तिकामना असीत् तदापि जनानाम्|
- चिररोगमुक्तये अपि इष्टयः अनुष्ठीयन्ते स्म|
- यद्यपि एका एव इष्टि: उपलभ्यते अत्र तथापि शारीरिकारोग्येण सह मानसिकारोग्यस्यापि विचारः वर्तते|

## संक्षेपा:-

आप.श्रौ.सू.- आपस्तम्बश्रौतसूत्रम्|
का.सं.- काठकसंहिता|
तै.सं.- तैत्तिरीयसंहिता|
पू.मी.- पूर्वमीमांसा|
मा.श्रौ.सू.- मानवश्रौतसूत्रम्|
मै.सं.- मैत्रायणीसंहिता|
ला.श्रौ.सू.- लाट्यायनश्रौतसूत्रम्|
वा.श्रौसू.- वाधूलश्रौतसूत्रम्|
वाच.- वाचस्पत्यम्|
सत्या.श्रौ.सू.- सत्याषाढश्रौतसूत्रम्|

## सन्दर्भग्रन्थसूची

[1] आनन्दचन्द्र, वेदान्तवागीश (सम्पा.). १९८२. *लाट्यायनश्रौसूत्रम् अग्निस्वामिविरचितभाष्यसहितम्.* द्वितीय संस्करण. दिल्ली : मुन्शीराम मनोहरलाल प्रकाशन.
[2] आपटे, विनायक (संशो.). १९३०. *सत्याषाढविरचितं श्रौतसूत्रं महादेवशास्त्रिसंकलित प्रयोगचन्द्रिकावैजयन्तीव्याख्यासमेतम्.* पुणे: आनन्दाश्रम.
[3] केवलानन्दसरस्वती (सम्पा.) १९५६. *मीमांसाकोश: खण्ड ४.* वाई: प्रज्ञा पाठशाला मण्डल.
[4] गेल्डेर, जे. एम. (सम्पा.). १९८५. *मानवश्रौतसूत्रम्.* पुनरावृत्ति. दिल्ली: सद्गुरू प्रकाशन.
[5] चौबे, ब्रजबिहारी (सम्पा.). १९९३. *वाधूलश्रौतसूत्रम्.* होशियारपुर: कात्यायन वैदिक साहित्य प्रकाशन.
[6] धर्माधिकारी, त्रिविक्रम (सम्पा.) १९८५. *तैत्तिरीय-संहिता, भट्टभास्कर-सायणाचार्य-विरचित-भाष्याभ्यां समेता.* पुणे: वैदिकसंशोधनमण्डल.
[7] नरसिंहाचार्य: १९४४. *आपस्तम्बश्रौतसूत्रं धूर्तस्वामिभाष्यभूषितं श्रीरामाग्निचिद्वृत्तिसहितम्.* मैसूर: ओरियण्टल लायब्ररी प्रकाशनम्.
[8] भट्टाचार्य, श्रीतारनाथ. १९६२. *वाचस्पत्यम्.* वाराणसी: चौखम्बा संस्कृत सिरीज आफिस.
[9] सातवळेकर, श्रीपाद (सम्पा.) १९४३. *काठकसंहिता.* औन्ध: स्वाध्यायमण्डल प्रकाशन.
[10] Caland, W. (Ed.). 1982. *Baudhāyana Śrautasūtra (originally published 1904-13).* Delhi: Munshiram Manoharalal.
[11] Dharmadhikar, T. N. (Ed. andTr.). 2013. *Katiyesti-Dipakah DPM Padhhati.* New Delhi: Muktabodha Indological Research Institute.
[12] Dharmadhikar, T. N. 2008. *Maitrāyiṇī Saṁhitā Its Ritual and Language.* Pune: Adarsh Sanskrit Shodh Samsathan.
[13] Keith (Tr.) 1914. *Taittiriya Saṁhitā. Part 1 Kāṇdas I-II.* Cambridge: The Harvard University Press.
[14] Thite, G. U. (Tr.). 2004. *Āpastamba Śrautasūtra Text with English Translation & Notes Vol. 1.* Delhi: Bhāratīya Book Corporation.

https://www.gapbhasha.org/